Shloka
(in devanagari)

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ २.५९ ॥

(in English)

viṣayā vinivartantē nirāhārasya dēhinaḥ |
rasavarjaṁ rasō:'pyasya paraṁ dṛṣṭvā nivartatē || 2.59 ||

Index Ref 2nd chapter,59 of 72

पदच्छेदः विषयाः, विनिवर्तन्ते, निराहारस्य, देहिनः ।
रसवर्जम्, रसः, अपि, अस्य, परम्, दृष्ट्वा, निवर्तते ॥

अन्वयार्थः
(Prose order with meaning & introduction to the word)

निराहारस्य	नेरशनस्य,भक्षणरहितस्य	Abstinent	अ.पुं.ष.एक.
देहिनः	शरीरधारिणः,कायवतः	of the man	न.पुं.ष.एक.
विषयाः	इन्द्रियविषयाः	objects	अ.पुं.प्र.बहु.
रसवर्जम्	तद्विषयकप्रीतिं विना,	leaving the longing	णमुलन्तम् अव्ययम्
विनिवर्तन्ते	अपगच्छन्ति,	fall away	वि+नि+वृत् - आत्म.लट्.प्रपु.बहु.
परम्	परमात्मानम्,अत्युन्नतम्	the Supreme	अ.नपुं.प्र.एक.
दृष्ट्वा	अवलोक्य,वीक्ष्य	having seen	क्त्वान्तम् अव्ययम्
(स्थितस्य) अस्य	एतस्य	of this (man of settled wisdom)	इदम् - म.सर्व.पुं.ष.एक.
रसः अपि	रुचिः अपि	longing even	अ.पुं.प्र.एक. / अव्ययम्
निवर्तते	अपयाति	falls away	नि+वृत्-आत्म.लट्.प्रपु.एक.

अर्थः निराहारस्य देहिनः विषयाः रसवर्जं विनिवर्तन्ते (किन्तु) अस्य रसः अपि परं दृष्ट्वा (स्थितस्य) निवर्तते ।

Meaning Objects fall away from the abstinent man, leaving the longing behind. But his longing also ceases, who sees the supreme.

तात्पर्यं यः रोगपीडितः भवति तस्य निराहारत्वात् विषयाः सर्वेऽपि अपगच्छन्ति । किन्तु तद्विषयकस्नेहः न अपगच्छति । किन्तु सः यदा अवहितः सन् परतत्त्वम् अनुसन्दधाति तदा विषयस्नेहोऽपि अपगच्छति ।

व्याकरणम्

सन्धिः

विषया विनिवर्तन्ते	- विषयाः	+ विनिवर्तन्ते	विसर्गसन्धिः (लोपः)
रसोऽपि	- रसः	+ अपि	विसर्गसन्धिः(सकारः) उकारः, गुणः पूर्वरूपं च
अप्यस्य	- अपि	+ अस्य	यण् सन्धिः

समासः रसवर्जम् - रसं वर्जयित्वा - भावे णमुल् प्रत्ययः उपपदसमासश्च ।

कृदन्तः दृष्ट्वा दृश्यताम् - १.२

तद्धितान्तः देहिनः - देह + इनि (मतुबर्थे) । देहः अस्य अस्मिन् वा अस्ति ।